नल्लान् कृष्णमाचार्यविरचितम्

मृतसञ्जीवनम्

संस्कृतभाषाप्रचारिणीसभा - चित्तूरु

तृतीया परीक्षा - विचक्षणः

vyōma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

ससन्दर्भं व्याख्यात

- नायम् एकाक्षी, यदि मनुते लोकसंहारकाक्षी।

अयं सन्दर्भः नल्लान् चक्रवर्तिकृष्णमाचार्येण विरचिते 'मृतसञ्जीवनम्' नाम नाटके प्रथमोऽङ्के वर्तते।

बृहस्पतिना इन्द्रमुद्दिश्य उक्तमिदम्। समाधिगतः बृहस्पतिः मृतानां राक्षसानां पुनरागमनाय असुरगुरुः शुक्राचार्यः एव कारणमिति विज्ञाय इन्द्रं निवेदयति। इमां वार्तां श्रुत्वा आश्चर्यान्वितः सः इन्द्रः स्वस्य आचार्यं बृहस्पतिं 'कथमेकाक्षिणः कार्यमिदम्?' इति पृच्छति। तदा आचार्येण 'हे! सहस्राक्ष! नायम् एकाक्षी, यदि मनुते लोकसंहारकाक्षी – हे! इन्द्र! शुक्राचार्यः नैव एकाक्षी, यदि सः संकल्पयति, तर्हि लोकं संहर्तुमपि सः समर्थः। इत्यर्थं बोधयता एवम् उक्तम्। ततः परं देवानां विजयाय उपायः चिन्तितः।

vyōma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology